# Sanakadikakritah Shri Hari Stuti

# સનકાદિકકૃતાઃ શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Sanakadikakritah Shri Hari Stuti

File name : sanakAdikakRRitAHshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# સનકાદિકકૃતાઃ શ્રીહરિસ્તુતિઃ

(વસન્તતિલકમ્)
સ્વામિન્ હરેઽક્ષરપતે કમનીયમૂર્ત
આનન્દકન્દ નિગમાગમગીતકીર્તે ।
નૈકાણ્ડનાયક વિભો ગુણવારિરાશે
વન્દામહે પરમહંસગતિં મુહુસ્ત્વામ્ ॥ ૧॥

ત્વં વૈ પરાત્પરતરે પરમે સ્વકીયે
ધાન્યક્ષરે પરમસૌખ્યમહાપયોધે ।
સંસેવિતઃ પરમમુક્તગણૈઃ સદૈવ
સંરાજસે પરમપૂજ્યપદારવિન્દઃ ॥ ૨॥

દિવ્યાદ્ભુતાનવધિકાતિશયસ્વસિદ્ધ-
સૌશીલ્યકારુણિકતાદિગુણૈકધામન્ ।
આત્યન્તિકીં નનુ વિમુક્તિમિહ પ્રદાતું
નૃભ્યસ્ત્વયા નટવદ્ ધૃતમસ્તિ નાટ્યમ્ ॥ ૩॥

ત્વત્તઃ પ્રભો પરમમૈશ્વરમાપ્ય સર્વે
શ્રીવાસુદેવરઘુનન્દનદત્તમુખ્યાઃ ।
આદેશતો હ્યવતરા ભગવંસ્તવૈવ
ક્ષોણીતલે પ્રતિયુગં કિલ સમ્ભવન્તિ ॥ ૪॥

યે તે વદન્તિ સકલાવતરૈકહેતોઃ
સામ્યં ચ તૈરવતરૈઃ પ્રકટપ્રતાપ ।
જાનન્તિ મન્દમતયો ન હિ તેઽવતારિન્
સર્વેશ્વરસ્ય કિ
ત્વામેવ નાથ સતતં ફણિનાયકાદ્યા
વ્યાસાદયો મુનિવરાશ્ચ પુરાણદક્ષાઃ ।
ગાયન્તિ તે ચરણપદ્મસુસક્તચિત્તા-

શ્ચૈવં ભવો હરિરજશ્ચ સુરાઃ સમસ્તાઃ ॥ ૬॥

સ્વામિન્નપરમહિમઁસ્તવ સન્મહિમ્નઃ
પારં ન યાન્તિ નિખિલા અપિ ચાક્ષરાદ્યાઃ ।
વ્યોમ્નો યથા ગરુડમુખ્યપતત્ત્રયશ્ચ
નક્રાદયશ્ચ જલજા જલધેર્યથૈવમ્ ॥ ૭॥

સાક્ષાત્ત્વદીયપરમેક્ષણતઃ પ્રમોદં
પ્રાપ્તાઃ સ્વતન્ત્ર કૃતકૃત્યતમાશ્ચ જાતાઃ ।
ધર્માત્મજ સ્વશરણાગતવત્સલેશ
વન્દામ મુનિપતિં પુરુષોત્તમં ત્વામ્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
ચતુર્વિંશતિતમે તરઙ્ગે સનકાદિકકૃતાઃ શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Sanakadikakritah Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*